

# गणपति प्रार्थन घनापाठं-ॐ गणानां त्वा गणपतिग्

https://www.chalisa.online

|| गणपति प्रार्थन घनापाठं ||
ॐ गणानां त्वा गणपतिग् हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥
प्रणो देवी सरस्वती । वाजेभिर्-वाजिनीवती । धीनामवित्र्यवतु ॥
गणेशाय नमः । सरस्वत्यै नमः । श्री गुरुभ्यो नमः ।
हरिः ॐ ॥
घनापाठः
गणानाम् त्वा गणानाम् गणानाम् त्वा गणपतिं गणपतिं त्वा गणानां गणानां त्वा गणपतिम् ॥
त्वा गणपतिं त्वात्वा गणपतिग् हवामहे हवामहे गणपतिं त्वात्वा गणपतिग् हवामहे । गणपतिग् हवामहे हवामहे गणपतिं गणपतिग् हवामहे कविन्कविग् हवामहे गणपतिं गणपतिग् हवामहे कविम् । गणपतिमितिगण-पतिम् ॥
हवामहे कविं कविग् हवामहे हवामहे कविं कवीनान्कवीनां कविग् हवामहे हवामहे कविन्कवीनाम् ॥
कविन्कवीनान्कवीनां कविन्कविं कवीनामुपमश्रवस्तम मुपमश्रवस्तम न्कवीनां कविन्कविं कवीनामुपमश्रवस्तमम् ॥
कवीनामुपमश्रव स्तममुपमश्रवस्तमं कवीना न्कवीना मुपमश्रवस्तमम् । उपमश्रवस्तम मित्युपमश्रवः-तमम् ॥
ज्येष्ठराजं ब्रह्मणां ब्रह्मणां ज्येष्ठराजं ज्येष्ठराजं ज्येष्ठराजं ब्रह्मणां ब्रह्मणो ब्रह्मणो ब्रह्मणां ज्येष्ठराजं ज्येष्ठराजं ज्येष्ठराजं ब्रह्मणां ब्रह्मणः । ज्येष्ठराजमितिज्येष्ठ राजम् ॥
ब्रह्मणां ब्रह्मणो ब्रह्मणो ब्रह्मणां ब्रह्मणां ब्रह्मणस्पते पतेब्रह्मणो ब्रह्मणां ब्रह्मणां ब्रह्मणस्पते ॥
ब्रह्मणस्पते पते ब्रह्मणो ब्रह्मणस्पत आपते ब्रह्मणो ब्रह्मणस्पत आ । पत आ पतेपत आनोन आपते पत आनः ॥
आनोन आनश्शृण्वन् छृण्वन्न आनश्शृण्वन् । न श्शृण्वन् छृण्वन्नोन श्शृण्वन्नूतिभि रूतिभिश्शृण्वन्नोन श्शृण्वन्नूतिभिः ॥
श्शृण्वन्नूतिभि रूतिभिश्शृण्वन् छृण्वन्नूतिभिस्सीद सीदोतिभिश्शृण्वन् छृण्वन्नूतिभिस्सीद ऊतिभिस्सीद सीदोतिभि रूतिभिस्सीद सादनग् सादनग् सीदोतिभिरूतिभिस्सीद सादनम् । ऊतिभि रित्यूति-भिः ॥
सीदसादनग् सादनग् सीद सीद सादनम् । सादनमिति सादनम् ॥
प्रणो नः प्रप्रणो देवी देवी नः प्रप्रणो देवी । नो देवी देवी नोनो देवी सरस्वती सरस्वती देवी नो नो देवी सरस्वती ॥
देवी सरस्वती सरस्वती देवी देवी सरस्वती वाजेभिर्वाजेभि स्सरस्वती देवी देवी सरस्वती देवी सरस्वती वाजेभिः ॥
सरस्वती वाजेभि र्वाजेभि स्सरस्वती सरस्वती वाजेभि र्वाजिनीवती वाहिनीवती वाजेभि स्सरस्वती सरस्वती वाजेभि र्वाजिनीवती ॥
वाजेभिर्वाजिनीवती वाजिनीवती वाजेभिर्वाजेभिर्वाजिनीवती । वाजिनीवतीति वाजिनीवती वाजेभिर्वाजेभिर्वाजिनीवती । वाजिनीवतीति वाजिनी-वती ॥
धीना मवित्र्यवित्री धीनां धीनामवित्र्य वत्व वत्ववित्री धीनां धीनामवित्र्यवतु । अवित्र्यवत्वव त्ववित्र्यवि त्र्यवतु । अवत्वित्यवतु ॥

|| https://www.chalisa.online ||